# .. shreyaskarIstotram ..

# ॥ શ્રેયસ્કરીસ્તોત્રમ્ ॥

## Document Information

Text title : shreyaskarIstotram

File name : shreyaskarIstotram.itx

Location : doc_devii

Author : kRiShNAnandasarasvatIvirachitaM

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : June 10, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ શ્રેયસ્કરીસુમઙ્ગલસ્તોત્રમ્ ॥

શ્રીઃ ।
શ્રેયસ્કરિ શ્રમનિવારિણિ સિદ્ધવિદ્યે
 સ્વાનન્દપૂર્ણહૃદયે કરુણાતનો મે ।
ચિત્તે વસ પ્રિયતમેન શિવેન સાર્ધં
 માઙ્ગલ્યમાતનુ સદૈવ મુદૈવ માતઃ ॥ ૧॥

શ્રેયસ્કરિ શ્રિતજનોદ્ધરણૈકદક્ષે
 દાક્ષાયણિ ક્ષપિતપાતકતૂલરાશે ।
શર્મણ્યપાદયુગલે જલજપ્રમોદે
 મિત્રે ત્રયીપ્રસૃમરે રમતાં મનો મે ॥ ૨॥

શ્રેયસ્કરિ પ્રણતપામરપારદાન-
 જ્ઞાનપ્રદાનસરણિશ્રિતપાદપીઠે ।
શ્રેયાંસિ સન્તિ નિખિલાનિ સુમઙ્ગલાનિ
 તત્રૈવ મે વસતુ માનસરાજહંસઃ ॥ ૩ ॥

શ્રેયસ્કરીતિ તવ નામ ગૃણાતિ ભક્ત્યા
 શ્રેયાંસિ તસ્ય સદને ચ કરી પુરસ્તાત્ ।
કિં કિં ન સિદ્ધ્યતિ સુમઙ્ગલનામમાલાં
 ધૃત્વા સુખં સ્વપિતિ શેષતનૌ રમેશઃ ॥ ૪॥

શ્રેયસ્કરીતિ વરદેતિ દયાપરેતિ
 વેદોદરેતિ વિધિશઙ્કરપૂજિતોતિ ।
વાણીતિ શમ્ભુરમણીતિ ચ તારિણીતિ
 શ્રીદેશિકેન્દ્રકરુણેતિ ગૃણામિ નિત્યમ્ ॥ ૫॥

શ્રેયસ્કરિ પ્રકટમેવ તવાભિધાનં
 યત્રાસ્તિ તત્ર રવિવત્પ્રથમાનવીર્યમ્ ।
બ્રહ્મેન્દ્રરુદ્રમરુતાદિગૃહાણિ સૌખ્યૈઃ
 પૂર્ણાનિ નામમહિમા પ્રથિતસ્ત્રિલોક્યામ્ ॥ ૬॥

શ્રેયસ્કરિ પ્રણતવત્સલતા ત્વયીતિ
 વાચં શૃણુષ્વ સરલાં સરસાં ચ સત્યામ્ ।
ભક્ત્યા નતોઽસ્મિ વિનતોઽસ્મિ સુમઙ્ગલે ત્વત્-
 પાદામ્બુજે પ્રણિહિતે મયિ સન્નિધત્સ્વ ॥ ૭॥

શ્રેયસ્કરીચરણસેવનતત્પરેણ
 કૃષ્ણેન ભિક્ષુવપુષા રચિતં પઠેદ્યઃ ।

તસ્ય પ્રસીદતિ સુરારિવિમર્દનીયમ્-
અમ્બા તનોતિ સદનેષુ સુમઙ્ગલાનિ ॥ ૮॥

યથામતિકૃતસ્તુતૌ મુદમુપૈતિ માતા ન કિં
યથાવિભવદાનતો મુદભુપૈતિ પાત્રં ન કિમ્ ।
ભવાનિ તવ સંસ્તુતિં વિરચિતું ન ચાહં ક્ષમસ્-
તથાપિ મુદભેષ્યસિ પ્રદિશસીષ્ટમમ્બ ત્વરાત્ ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યકૃષ્ણાનન્દસરસ્વતીવિરચિતં
શ્રેયસ્કરીસુમઙ્ગલસ્તોત્રં સમાપ્તમ્ ।

Proofread by Nat Natarajan nat.natarajan at gmail.com, NA

.. shreyaskarIstotram ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*